# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

[पूर्वाङ्कात् अनुवर्तते...]

अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः

वृन्दावनधाम्नि महाराजस्य इदं द्वितीयवारम् आगमनम् अभवत्। स्वधाम्नि उपस्थितः व्रजगोपबालः भगवद्भावेन तन्मयो भवति स्म। इत्थं कति दिनानि अतीतानि, कति महानिशाः संयाताः—नासीत् भगवद्ध्याने निमग्नस्य महाराजस्य तत्र अवधानम्। स कदाचित् सुबोधानन्दस्वामिना आनीतं भिक्षान्नं भुङ्क्ते स्म, कदाचित् अनादरेण तत् पतितमेव भवति स्म। कदाचित् मन्दिरगमनपूर्वकं भावविह्वलचित्तेन अनिमेषचक्षुषा श्रीविग्रहं पश्यन् भवति। कदाचिद्वा समाधौ निमग्नस्य तस्य बाह्यज्ञानं तिरोभवति स्म। किञ्च रात्रौ निद्रां विहाय ध्यानमेव अधिकं भवति स्म। समयेऽस्मिन् विजयकृष्णगोस्वामि-महोदयः श्रीवृन्दावने निवसति स्म। महाराजस्य कठिनतपस्यायाः वार्तां ज्ञात्वा एकद्युः स तत्सकाशम् उपस्थाय जिज्ञासितवान्— "परमहंसदेवः खलु भवन्तं सर्वप्रकाराणि साधनभजनाद्यनुभूतिदर्शनादीनि कारितवान्, तथापि किमर्थमिदानीम् एवं भृशं साधनाम् अनुतिष्ठति भवान्?" ब्रह्मानन्दः मृदुस्वरेण प्रत्युत्तरितवान्— "तस्य कृपया अनुभूतिः दर्शनं वा यत् सर्वमभूत्, इदानीं तत्सर्वम् आयत्तीकर्तुं चेष्टे केवलम्।" गोस्वामिमहोदयः उत्तरमिदं कथं स्वीकृतवान् तन्न ज्ञायते, परन्तु रामकृष्णसङ्घस्य इतिहासपर्यालोचकस्य दृष्ट्या एवंविधतपस्यायाः गूढतात्पर्यं वर्तते। सङ्घस्य अध्यात्मचेतना सदा क्रियाशीला स्यात् इत्यतः सङ्घस्य मर्मस्थले एकम् एतादृशं शक्तिकेन्द्रम् आवश्यकम् आसीत्, यस्मात् केन्द्रात्

कर्मणि व्यापृता अन्ये आधाराः प्रयोजनानुसारेण स्वं स्वं पौनःपुन्येन परिपूर्य श्रीरामकृष्णस्य भावधाराम् अव्याहतगत्या अग्रे नयेयुः। इतःपरम् कदाचिद् महाराजस्य ज्वरः अभूत्। तदा अचिरात् गोस्वामिमहोदयः तस्य दर्शनार्थम् आगत्य सुबोधानन्दात् ज्ञातवान् यत्, रोगाक्रान्तस्य मशकनिरोधनी नास्ति। श्रवणमात्रेण स मशकनिरोधन्याः औधषस्य च व्यवस्थां सम्पादितवान्। किञ्च भगवतः कृपया ब्रह्मानन्दः शीघ्रम् उल्लाघः सञ्जातः। तावता सुबोधानन्दस्य मनः पूर्वसङ्कल्पानुसारेण उत्तराखण्डगमननिमित्तम् अतीव व्यग्रम् अभवत्। महाराजस्य समीपे यदा इदं ज्ञापितवान् तदा महाराजः सानन्दं तस्य यात्रार्थम् अनुमतिं प्रदत्तवान्। परन्तु सः स्वयं वृन्दावने अतिष्ठत्।

वृन्दावने अवस्थानकाले स एकस्मिन् दिवसे अपश्यत् यत्, भक्तप्रवरः श्रीबलराममहोदयः ज्योतिर्मयदेहसमन्वितः हसन् दिव्यलोकम् आरोहत्। परं यथासमयं पत्रेण ज्ञातवान् यत्, स देहत्यागं कृतवान् (नवत्युत्तराष्टदशशततम-क्रैस्तवर्षस्य एप्रिल्-मासस्य त्रयोदशदिनाङ्के)। इतःपरम् इतोऽपि मासाधिकं कालं वृन्दावने स्थित्वा सेप्टेम्बर्-मासस्य अन्तिमे स पद्भ्याम् एव हरिद्वारे उपनीतः अभूत्। अपरे केचन गुरुभ्रातारः तस्मिन् स्थाने पूर्वतः एव तपोनिरताः अविद्यन्त। एकनवत्युत्तराष्टदशशततम-क्रैस्तवर्षस्य जानुयारि-मासे एकस्मिन् दिने स्वामी विवेकानन्दः तैः सहः ब्रह्मानन्दसकाशं समागत्य तैः सह गमनार्थं तम् आदिष्टवान्। महाराजः तस्य आदेशानुसारं मेरठनगरं गतवान्, तत्र अखण्डानन्देन सह मिलितवान् च। मेरठनगरे मार्चमासं यापयित्वा स्वामिविवेकानन्दः सर्वान् सूचयित्वा निःसङ्गः भ्रमणार्थं निर्गतवान्। ततः ब्रह्मानन्दस्वामी अपि तुरीयानन्दस्वामिना सह एप्रिल्-मासि ज्वालामुखीतीर्थं प्रति निरयात्। ज्वालामुखीनगरात् तौ काङ्गडा, पाठानकोटः, गुजरानवाला, लाहोरः, मन्टगोमारी, मूलतानं, सक्करः इत्यादिनगराणि भ्रमित्वा कराचीनगरम् आगतवन्तौ। कराचीनगरात् पोतेन बम्बै-नगरम् आगत्य पुनः स्वामिना

विवेकानन्देन तयोः मेलनं जातम्। विवेकानन्दस्वामी तदा आमेरिकां गन्तुम् उद्युक्तः, किन्तु तत्पूर्वं खेतड़ीराजस्य आह्वानानुसारेण तेन सह साक्षात्कर्तुं प्रवृत्तः। ब्रह्मानन्दः तुरीयानन्दश्चापि तेन सह गच्छन्तौ आबुरोड इत्याख्ये रेलस्थानके अवतीर्य अर्बुदपर्वते उपस्थितौ अभवताम्। स्वामिविवेकानन्दमहाराजस्य खेतड़ीनगरात् बम्बै-नगरस्य प्रत्यागमनकाले तौ पुनः आबुरोड-नामके स्थाने तेन सह स्वल्पक्षणं साक्षात्कृतवान्तौ। अतःपरं कानिचन दिनानि अर्बुदपर्वते स्थित्वा आवुरोड-नगरं प्रत्यावर्तेताम्, किञ्च स्वामिनः ब्रह्मानन्दस्य आह्वानेन बम्बै-नगरात् अखण्डानन्देऽपि तत्रागते त्रयः मिलित्वा आजमीरनगरं भ्रमित्वा जयपुरं गतवन्तः। ततः एकमासानन्तरम् अखण्डानन्दः राजपूताना-नगरम् उद्दिश्य निर्गतः। किञ्च महाराजः तुरीयानन्दस्वामी च वृन्दावनं गतवन्तौ।

वृन्दावनमागत्य उभौ सतीर्थौ दिव्यभावे निमग्नौ आस्ताम्। तुरीयानन्दः एकस्मिन् दिने अवदत् यत्, अद्य भिक्षार्थं न गच्छानि, पश्यामि राधाराणी भोजनं ददाति उत न। ध्याने निमग्नस्य गुरुभ्रातृद्वयस्य दिवारात्रम् एकं कथम् अतिक्रान्तम् इति न ज्ञातम्। परस्मिन् दिवसे कश्चन तीर्थयात्री स्वयं प्रचुरं खाद्यद्रव्यं दत्वा गतवान्। वृन्दावनात् तौ पद्भ्यां नन्दग्रामः, वर्षाणा, राधाकुण्डम्, श्यामकुण्डम्,गोवर्धनगिरिः इत्यादि दृष्ट्वा कुसुमसरोवरस्य निकटम् उपनीतौ। स्थानमिदं तपस्यानुकूलमिति दृष्ट्वा तत्रैव अतिष्ठताम्। अस्मिन् समये परिपालितस्य कठोरजीवनयापनस्य इतिहासं वयं किमपि न जानीमः इत्येव वक्तव्यम्। अन्यस्य समयस्य वा विषये वयं कियत् जानीमः, भावमयस्य ठाकुरस्य मानसपुत्रस्य नानातीर्थेषु यद्यत् साधनानुभूतिदर्शनादि अभवत् तस्य कियत् वयम् अस्मिन् क्षुद्रे प्रबन्धे लेखितुं शक्नुमः। इतोऽपि कियद् वा भाषया प्रकाशयितुं शक्यते। महाराजः प्रायः वदति स्म, निर्विकल्पसमाधेरनन्तरं धर्मजीवनम् आरभ्यते इति। यः निर्विकल्पकसमाधिः बहूनां जन्मनां साधनेन क्वचित् कस्यचिद्वा अदृष्टे लभ्यते, तस्मिन् प्रतिष्ठितः सन् किञ्च ततः ऊर्ध्वम्

अनुभूतिसम्पदा भूषितः यः बहून् भक्तान् धर्ममार्गे परिचालितवान्, तस्य अध्यात्मजीवनस्य अतिस्थूलाभासमात्रं वयं परिचाययितुं सक्षमाः।

दीपशिखा